ISSN : 2321-2160

# AYUDH

International Peer-Reviewed Refereed Journal

46th Issue Volume-1 March-2019

**Editor in Chief:**
**Mr. Rohit Parmar**

## Advisory Board

- Prof. H. N. Vaghela (Former Acting V. C.)
  Professor & Head,
  Department of Hindi,
  M. K. Bhavnagar University, Bhavnagar,
  Gujarat, India
- Prof. (Dr.) Chetan Trivedi
  (I/C Vice Chancellor)
  Bhakta Kavi Narsinh Mehta University,
  Junagadh, Gujarat, India
- Dr. R. P. Bhatt
  Principal,
  Bahauddin Govt. Science College,Junagadh,
  Gujarat, India
- Prof. Jaydipsinh K. Dodiya
  Professor & Head,
  Department of English & CLS,
  Saurashtra University, Rajkot, Gujarat
  India
- Dr. Martina R. Noronha
  Principal,
  Sir K. P. College of Commerce, Surat
  Gujarat, India

## Editorial Board

- Dr. Jiten J. Parmar (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Mr. Dilip B. Kataliya (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Dr. Arjun G. Dave
  Founder & Owner
  Vedant Educational Services, Rajkot
  Gujarat, India
- Dr. Pravat Dangal
  Associate Professor,
  St. Joseph's College, Darjeeling,
  West Bengal, India
- Dr. Dnyaneshwar L. Sonawane
  Assi. Professor,
  Swami Ramanand Teerth Mahavidyalaya,
  Ambajogai, Dist. Beed, Maharashtra, India

Scanned with CamScanner

20. Human Resource Accounting: Objectives
Ganeshbhai C. Narbhavar....62
21. Indian Banking – Challenges and Opportunities
Mukesh Goyani....65
22. Accounting Standards an Overview
Tusharkumar Jayantilal Prajapati....70
23. ઘોઘા બંદર: કોળી સમુદાયની આર્થિક સ્થિતિ
રમેશભાઈ ગોપાભાઈ બાંભણિયા....75
24. ભારતીય અર્થતંત્રમાં LPGની નીતિના હેતુઓ અને ભૂમિકા
પ્રગ્ના પરમાર....78
25. Women's condition and their subjugation in Waiting for the Barbarians by J. M. Coetzee
Augustin Rayappa....81
26. ગાંધી વિચાર: શિક્ષણની આવતીકાલ
તૃપ્તિ વિનોદરાય વાળા....84
27. દાહોદના ભીલલોકોના ભીલીબોલીના લગ્નના લોકગીતો
ડૉ. અલ્કેશકુમાર પી. ડામોર....87
28. ગાંધીજી દ્વારા જાહેરકાર્ય માટે નાણાકીય સંસાધનો એકત્ર કરવાના પ્રયાસ
અશ્વિન બી. ઝાલા....91
29. ભારતમાં આદિવાસી સ્ત્રીઓનું સ્થાન
Dr. Priti C. Patel....97
30. ગીર–સોમનાથ અને રાજકોટ જિલ્લાની ખેલાડી બહેનોની ઝડપ અને પગની વિસ્ફોટક શક્તિનો અભ્યાસ
જયેશ વીરસિંહભાઈ પટેલ....101
31. 'गटर का आदमी' उपन्यास में गटर समाज की मार्मिक संवेदनाएँ
तेजसकुमार ए. अमीन....104
32. મહિલા સાક્ષરતા સમસ્યા અને સમાધાન
ડૉ. જયસિંહ બી. ઝાલા....107
33. GST (Goods and Service Tax)
Darshna Joshi....110
34. લોકવાઙ્મયનું સ્વરૂપ
ડૉ. આકાંક્ષા પટેલ....114
35. Patriotic Utterances and Hybridity in the Poem of Henery Derozio, "The Harp of India"
Paras N. Chavda....118
36. ।। शाङ्करभाष्यनुसारं श्रीमद्भगवद्गीतायाम् आत्मस्वरूपम् ।।
जिगरः एम्. भट्ट....121
37. હિંદછોડો ચળવળ–૧૯૪૨માં સૂરત જિલ્લાના પ્રદાનની માહિતીના સાધન તરીકે ગુજરાતમિત્ર અને ગુજરાત દર્પણ
ડૉ. પીયૂષ સુરેશચંદ્ર અંજીરીયા....123
38. International Banking Operations: Conceptual Approach, Benefit and Insecurity, Future of International Banking
Mr. Aalap Rameshchandra Suthar....126
39. Indian Education System Eror
Assi. Pro. Vishnu Prajapati....131

2020-6-15 22:23

Scanned with CamScanner

# ॥ शाङ्करभाष्यानुसारं श्रीमद्भगवद्गीतायाम् आत्मस्वरूपम् ॥

जिगरः एम्. भट्ट
शोधच्छात्र,
संस्कृतभवनम्, सौराष्ट्र युनिवर्सिटी, राजकोट

सर्वासामुपनिषदां सारतत्त्वं भगवान् वेदव्यासः श्रीमद्भगवद्गीतायां जग्रन्थ । अत्र शोकमोहादिभिः प्रपीड्यमानः अर्जुनः भगवतो मुखेन अनुष्ठातव्यं धर्मम् अधीत्य युद्धार्थं सज्जोऽभवत् । तत्र भगवता यत्किमपि उपदिष्टं तत्सर्वं श्रीमद्भगवद्गीता इति नाम्ना अभिधीयते । भगवान् शङ्कराचार्यः अस्याः विषये स्वकीयभाष्ये लिलेख यत् - इदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतम् दुर्विज्ञेयार्थं च[1] इति । अत्र बिन्दुत्रये अवधातव्यम् - १. गीतायाः गणना शङ्कराचार्येण शास्त्रे कृता अतः गीताशास्त्रम् इत्युक्तम् । २. इदं गीताशास्त्रं सर्ववेदानां सारस्य सङ्ग्रहरूपं वर्त्तते । ३. इदं गीताशास्त्रं दुर्विज्ञेयार्थम् अर्थात् अस्य अर्थगमनम् अतीव दुष्करं वर्त्तते ।

दुष्करम् अर्थगमनम् इति जानन्तोऽपि आचार्याः क्षीरनिधिं मथ्नातुं मत्स्या इव प्रयत्नं कृतवन्तो दृश्यन्ते । भगवद्गीतायाः यावन्ति सन्ति भाष्याणि न तावन्ति अन्यग्रन्थस्य तथापि गीताज्ञानसागरस्य अन्तं गन्तुं नाशक्नुवन् विद्वांसः आचार्याः, अस्माकं तु का कथा ? अत एव शाङ्करभाष्ये प्रस्तावनायाम् आचार्य-शङ्करः लिखति यत् - अहं विवेकतः अर्थनिर्धारणार्थं सङ्क्षेपतो विवरणं करिष्यामि[2] इति ।

अस्यां गीतायां समस्तवेदार्थसारसङ्ग्रहो वर्त्तते तस्मात् विविधप्रकारकं ज्ञानमत्र सम्भाव्यते । अत्रैकः विषयः वर्त्तते आत्मतत्वम् । वेदेषु वेदान्तेषु च यस्यात्मनः स्वरूपं निरूपितं वर्त्तते, यत्तत्वं ज्ञातुं योगि-नोऽपि दत्तैकचित्ताः भ्रममनुभवन्ति, तस्यात्मनः स्वरूपं गुणाश्च भगवता गीतायां प्रत्यपादि । शङ्करा-चार्यदृष्ट्या भगवता उक्तस्य आत्मतत्त्वस्य तात्पर्यं किम् इति यथाभाष्यं यथामति चात्र प्रस्तूयते।

कोऽयमात्मा ? प्रश्नस्यास्य यथार्थम् उत्तरं दातुं न कोऽपि सम्भवति । वेदान्तसारनामा ग्रन्थः यदा अस्माभिः पठ्यते तदा तत्र आत्मनः स्वरूपविषये भिन्नभिन्नमतानि अस्माकं दृष्टिपथमायान्ति । तत्र कश्चित् अतिप्राकृतः पुत्रमात्मानं मनुते[3] । चार्वाकाणां सन्ति मतान्तराणि, कश्चिच्चार्वाकः स्थूलशरीरम्[4], कश्चिदिन्द्रियाणि[5], कश्चित्प्राणान्[6], कश्चिच्च मन[7] आत्मानं मन्यते । योगाचारिणां बौद्धानामनुसारं बुद्धिः आत्मा[8], प्राभाकरतार्किकानामनुसारम् अज्ञानम् आत्मा[9], कुमारिलभट्टादयः मीमांसकाः अज्ञानोपहितं चैतन्यम् आत्मानं मन्वते[10]। माध्यमिकबौद्धानामनुसारं सर्वाभावस्वरूपं शून्यमेवात्मा[11] ।

सदानन्दयतिः पूर्वोक्तमतानां खण्डनं कृत्वा आत्मनः स्वरूपं वक्ति - पुत्रादारभ्य शून्यं यावत् सर्वमपि जडरूपं चैतन्याभासमात्रं च । अनित्यपदार्थानां प्रकाशकं वेदान्तविद्वद्भिः अनुभूतं श्रुतिभिः प्रमा-णितं नित्यं शुद्धबुद्धमुक्तस्वभावं प्रत्यक्चैतन्यम् एवात्मा[12] इति ।

भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायाम् आत्मनः स्वरूपं गुणाँश्च अनेकत्र प्रोवाच । तत्र द्विती-याध्याये मोहमुपगतम् अर्जुनं प्रति श्रीकृष्णः कथयति - य एनमात्मानं हन्तारं हतं वा मन्यते सः आत्मनः स्वरू-पादनभिज्ञः अस्ति । यतो हि आत्मा न हन्ति न वा हन्यते । शङ्कराचार्यः कथयति यत् यः आत्मानं हनन-क्रियायाः कर्त्तारं कर्म वा मन्यते सः अज्ञानी । आत्मा कर्त्ता कर्म वा न भवति[13] ।

अयमात्मा न जायते न वा म्रियते सः अजः नित्यः शाश्वतः पुराणश्चास्ति । शरीरे हतेऽपि आत्मनः हननं न भवति । आत्मा न जायते इत्यस्य तात्पर्यमस्ति - जनिलक्षणा वस्तुविक्रिया आत्मनः नास्ति । न म्रियते अर्थात् विनश्यतीति भावविकाररहितः । अजः अर्थात् अजन्मा । यस्य जन्म भवति तस्य मरणं निश्चितमेव[14] । किन्तु अयमात्मा जन्म न लभते तस्मादजः[15] इत्युच्यते ।



Scanned with CamScanner

जायते विनश्यति इति आद्यन्तयोः भावविकारयोः आत्मनि अभावः तस्मात् मध्यस्थानां चतुर्णामपि भावविकाराणाम् अभावः आत्मनि अस्ति इति ज्ञातव्यम् । अयमात्मा न विपरिणमते, केवलं शरीरमेव विप-रिणमते । किञ्च यः अवयवेभ्यः पुष्टो भवति स एव वर्धते । अयमात्मा तु निरवयवः तस्मात् न वर्धते । अपक्षीयते अर्थात् क्षयरूपं विकारं प्राप्नोति । आत्मा शाश्वतः इति उक्तत्वात्, निरव-यवत्त्वात् आत्मनः अवय-वापक्षयः तथा निर्गुणत्वात् गुणापक्षयोऽपि नास्ति । तात्पर्यमिदमस्ति यत् आत्मा षड्भावविकाररहितः[16] ।

अयमात्मा भावविकाररहितोऽस्ति इति कथितं तेन आत्मानं शस्त्राणि न छिन्दन्ति, पावको न दहति, आपो न क्लेदयन्ति, मारुतः न शोषयति इत्यादि गुणाः आत्मनः स्वाभाविकाः इति गृह्यते । षड्भाव-विकाररहित्ये इमे गुणाः भवन्त्येव । शाङ्करभाष्ये आचार्यः लिखति यत् - परस्परं नाशहेतूनि पञ्चभूतानि आत्मानं नाशयितुं नोत्सहन्ते । तस्मादात्मा नित्यः, नित्यत्वात् सर्वगतः, सर्वगतत्वात् स्थाणुः अर्थात् स्थाणु इव स्थिरः, स्थिरत्वादचलः अत एव सनातनः । सनातनो नाम न कुतश्चि-न्निष्पन्नः अभिनवः वा, पुरातन एव आत्मा इति[17] ।

अयमात्मा अव्यक्तः अचिन्त्यः अविकार्यश्च वर्त्तते । अव्यक्तो नाम बुद्ध्यादिभिः ज्ञानकारणैः ज्ञातु-मशक्यः । यस्य ज्ञानं भवति तस्यैव चिन्तनं क्रियते । आत्मनः अव्यक्तत्वात् चिन्तनं कर्तुं न शक्यते अतः अचिन्त्यः । अविकारी पूर्वमुक्त एव षड्भावविकाररहितः[18] ।

एनमात्मानं कश्चिद् आश्चर्यवत् पश्यति, आश्चर्यवद् वदति, आश्चर्यवत् शृणोति, कश्चिद्दृष्ट्वा उक्त्वा श्रुत्वा अपि आत्मानं न जानाति ।[19] पूर्वं कथितं यत् आत्मा अव्यक्तः, अत्र कथ्यते कश्चिद् आत्मानम् आश्च-र्यवत् पश्यति वदति श्रुणोति इत्यादि । अव्यक्तः आत्मा कथङ्कारं दृश्यते उच्यते श्रूयते वा? आश्चर्यवत् । भगवान् शङ्कराचार्यः कथयति - आश्चर्यं नाम अदृष्टपूर्वम् अद्भुतम् अकस्माच्च दृश्यमानम् । तेन तुल्यम् आश्चर्यवत् । अतः कश्चिद् एनमात्मानम् आश्चर्यवत् पश्यति वदति श्रुणोति च । कश्चिद्दृष्ट्वा उक्त्वा श्रुत्वाऽपि आत्मानं न जानाति । यः आत्मानं पश्यति वदति श्रुणोति च सः आश्चर्यतुल्यः भवति, आत्मा तु दुर्बोधः वर्त्तते[20] इति ।

इत्थं गीतायां आत्मस्वरूपनिरूपणमिति विषये सागराद् बिन्दु इव शाङ्करभाष्यदृष्ट्या अत्र प्रति-पादितम् । सम्पूर्णगीतायां यदि आत्मनः स्वरूपं भाष्यदृष्ट्या विविच्यते तर्हि शोधमहाप्रबन्धो भवेत् । इदं शोधपत्रमेव भवतु इति धिया किञ्चिदिव लिखितम् इति शम् ।

1प्रस्तावना श्रीमद्भगवद्गीता शाङ्करभाष्यम्

2 तत्रैव

3 अतिप्राकृतस्तु ..... पुत्र आत्मेति वदति । ( वेदान्तसारः )

4 चार्वाकस्तु...... स्थूलशरीरमात्मेति वदति । ( तत्रैव )

5 अपरश्चार्वाकः.... इन्द्रियाण्यात्मेति वदति । ( तत्रैव )

6 अपरश्चार्वाकः .... प्राणा अत्मेति वदति । ( तत्रैव )

7 अपरस्तु चार्वाकः ..... मन आत्मेति वदति । ( तत्रैव )

8 बौद्धस्तु ......... बुद्धिरात्मेति वदति । ( तत्रैव )

9 प्राभाकरतार्किकौ तु ......... अज्ञानमात्मेति वदतः । ( तत्रैव )

10 भाट्टस्तु ......... अज्ञानोपहितं चैतन्यमात्मेति वदति । ( तत्रैव )

11 अपरो बौद्धः ..... शून्यमात्मेति वदति । ( तत्रैव )

12 अतस्तत्तद्भासकं ...... प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः । ( तत्रैव )

13 २.१९ श्रीमद्भगवद्गीता शाङ्करभाष्यम् ।

14 २.२७ श्रीमद्भगवद्गीता ।

15 २.२० श्रीमद्भगवद्गीता शाङ्करभाष्यम् ।

16 तत्रैव ।

17 २.२३ श्रीमद्भगवद्गीता शाङ्करभाष्यम् ।

18 २.२५ श्रीमद्भगवद्गीता शाङ्करभाष्यम् ।

19 २.२९ श्रीमद्भगवद्गीता ।

20 २.२९ श्रीमद्भगवद्गीता शाङ्करभाष्यम् ।



Scanned with CamScanner